कायं बलेनोदकराक्षसम् । उतङ्कं दर्शयामास कृतकर्मा नराधिपः” हरिवं० ११ अ० २१४१ष्ठे कुवलाश्वशब्दे अस्य चरितानीति यत् लिखितं तत् प्रमादात् किन्तु धुन्धुमारशब्दे तच्चरितानि इत्येव तत्र पाठो बोध्यः । एतच्छब्दे च हरिवं० तच्चरितादिकथाऽभिहिता २शक्रगोपे ३दृढधूमे ४पदातिके च मेदि० ।

**धुर्** स्त्री धुर्व–क्विप् वा टाप् । १चिन्तायाम्, २रथाद्यग्रभागे, ३यानमुखे ४भारे च अमरः “धुर्य्याणां च धुरो मोक्षम्” रघुः । ५अग्रे न० “अपांशुलानां धुरि कीर्तनीया” रघुः । “गौरिव गुरुणा नित्यं धूर्षु नियोज्यमानः” भा० आ० २३अ० “तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे” रघुः । समासे अ समा० “न गर्दभा वाजिधुरां वहन्ति” उद्भ०। “अतन्तुभिर्युक्तधुरं तुरङ्गैः” रघुः । नञ्समा० न अ समा०। “न मामधुरि राजेन्द्र ! नियोक्तुं त्वमिहार्हसि” भा०व०३२अ०। अन्यस्य तु न अ समा०। अनधूः । “प्रतिगृह्णात्यनधुरावनक्ति” का०श्रौ०३८।३।२२ । ५हिंसके त्रि० । “दश धुरो दशयुक्तम् वहद्भ्याम्” ऋ० १०।९४।७ “धुरोधूर्भिर्हिंसितृभिः तृतीयार्थे प्रथमा” भा० असंज्ञायामपि टावन्तस्य क्वचित् तत्पुरुषे ङ्याषोरिति ह्रस्वः । “तार्क्ष्यं मारुतं रहोभिर्वाजिभि धुरवाहिभिः” भा०द्रो० ९९अ० भावे क्विप् । ६पीडायां च ।

**धुरन्धर** त्रि० धुरां धारयति खच् खचि ह्रस्वः । १भारवाहके इत्यादौ “यस्माद्देवगणाः सर्वे स्थावराणि चराणि च । धुरन्धराङ्गे तिष्ठन्ति तस्मात् भक्तिः शिवेऽस्तु मे” हेमा०दा० । २धवदृक्षे पु० मेदि० । ३तत्तत्कर्मनिर्वाहरूप भारवाहे च । “सन्त एव सतां नित्यमापदुद्धरणक्षमाः । गजानां पङ्कमग्नानां गजा एव धुरन्धराः” हितो० । ४श्रेष्ठे च । “धुरन्धरः पुण्यकृदेष तापसः” भा० उ० ३७अ० ।

**धुरीण** त्रि० धुरं वहति सर्वधुरादित्यत्र पा० योगविभागात् ख । १भारवाहके अमरः । २श्रेष्ठे शब्दच० ।

**धुरीय** त्रि० धुरमर्हति छ । इषे राजनि० ।

**धुर्य्य** त्रि० धुरं वहति “धुरो यड्ढकौ” पा० यत् । तद्धितयपरत्वान्न दीर्घः । १धुर्वहे इत्यादौ २कार्य्यनिर्वाहके “प्रागल्भमात्मा धुरि धुर्य्यवाग्मिनम्” किरा० । “धुर्य्यः कर्मनिर्वाहकः” मल्लि० । “समस्तकार्य्येषु गतेन धुर्य्यताम्” माघः । ३भारवाहके अमरः । ४श्रेष्ठे शब्दार्थचि० । ५वृषभे ६ऋषभौषधौ च पु० राजनि० इत्यादौ “नाविनीतैर्व्रजेद्धुर्य्यैः” मनुः । “येनेदं ध्रियते विश्वं धुर्य्यैर्यानमिवाध्वनि” कुमा० । “रात्रिर्गता मतिमतां वर ! मुञ्च शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता । तामेकतस्तव बिभर्त्ति गुरुर्विनिद्रो यस्या भवानपरधुर्य्यपदावलम्बी” रघुः । ७विष्णौ पु० । “स्कन्दः स्कन्दधरो धुर्य्यः” विष्णु० । समस्तजन्तुजन्मादिलक्षणकार्य्यनिर्वाहकत्वात्तस्य तथात्वम् भाष्ये उक्तम् ।

**धुर्व** हिंसे भ्वा० पर० सक० सेट् । धूर्वति अधूर्वीत् । दुधूर्व । ईदित् धूर्त्तः । “अधूर्वन् भूधरैर्ग्रामम्” भट्टिः ।

**धुवक** त्रि० धू–क्वुन् । १गर्भमोचके उज्ज्वल० । (धुया) ख्यातायां २गीतिभेदे स्त्री । क्षिपका० पाठान्तरे न टापि अत इत्त्वम् । ततः चतुरर्थ्यां प्रेक्षादि० इनि धुवकिन् । तत्सन्निहितदेशादौ त्रि० । ततः पिच्छा० अस्त्यर्थे इलच् । धुवकिल धुवकयुक्ते त्रि० ।

**धुवन** पु० धु–धू–वा क्युन् । १वह्नौ उज्ज्वलद० “ये यज्ञे धुवनं तन्वते” शत० ब्रा० ११।२।८।५ । २चालकमात्रे त्रि० । “अयमञ्चति पञ्चशरानुचरो नवनीपवनीधुवनः पवनः” सा० द० टी० ।

**धुवित्र** न० धूयते अनेन कुटा० धु–विधूनने इत्र । वह्निसंधुक्षणाय मृगचर्मादिरचिते याज्ञिकानां १व्यजने २तालवृन्तके अमरः ।

**धुस्तु(स्तू)र** पु० धूस्तूर+पृषो० । (धुतरा) ख्याते वृक्षे अमरः

**धू** कम्पने भ्वा०उभ०सक० वेट् । धवति ते अधावीत् अधोषीत् मुग्ध०पा०मते प०सिचि नित्येट्इतिभेदः अधमविष्ट अधोष्ट। दुधाव । “यत् कानने धवति चन्दनमञ्जरीश्च” कविर० ।

**धू** कम्पने वा० चुरा० उभ० पक्षे तुदा० कु० पर० सक० सेट् । धूनयति ते धुवति अदूधुनत् अधुवीत् । धूनयाम् बभूव आस चकार दुधाव । दुधुविथ “चूतं धुनाति धुवति स्फुरितातिमुक्तम् । वायुर्विधूनयति केशरपुष्परेणून्” कविरहस्यम् ।

**धू** कम्पने स्वा० क्र्यादि० प्वादिश्च उभ० सक० वेट् । धूनोति धूनुते धुनाति धुनीते । अधावीत् अधौषीत् अधविष्ट अधोष्ट “धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुरितातिमुक्तम्” कविरहस्यम् ।

**धू** स्त्री धू–क्विप् । विधूनने मेदि० ।

**धूःपति** पु० धुरः पतिः अहरादित्वात् पत्यादौ पत्वरत्वोपाध्मानीया वा । भारपतौ भारसहे पक्षे धुष्पति धूर्पति धूःपति तत्रार्थे